मधुरत्रयं, क्ली, ( मधुराणां त्रयम् । ) सिता माक्षिकं सर्पिश्च । इति राजनिर्घण्टः ॥

मधुरत्रिफला, स्त्री, ( मधुरा त्रिफला । ) द्राक्षाफलं काश्मर्य्यफलं खर्ज्जूरीफलञ्च । इति राजनिर्घण्टः ॥

मधुरनिस्वना, स्त्री, ( मधुरो निस्वनो यस्याः । ) मधुरस्वरयुक्ता नारी । इति त्रिकाण्डशेषः ॥

मधुरफलः, पुं, ( मधुरं फलमस्य । ) राजबदरः । इति राजनिर्घण्टः ॥

मधुरवल्ली, स्त्री, ( मधुरा वल्लीति नित्यकर्म्मधारयः । ) मधुबीजपूरः । इति राजनिर्घण्टः ॥

मधुरसः, पुं, ( मधुर्म्मधुरो रसोऽस्य । ) इक्षुः । इति शब्दमाला ॥ तालः । इति राजनिर्घण्टः ॥

मधुरसा, स्त्री, (मधुर्म्मधुरो रसो यस्याः ।) मूर्व्वा । इत्यमरः । २।४।८३ ॥ ( अस्याः पर्य्यायो यथा,

"तेजनी पिलुनी देवी तिक्तवल्ली पृथक्त्वचा ।
मधुश्रेणी मधुरसा मूर्व्वा निर्द्दहनीति च ॥"
इति वैद्यकरत्नमालायाम् ॥

"मूर्व्वा मधुरसा देवी मोरटा तेजनी स्रुवा ।
मधूलिका मधुश्रेणी गोकर्णी पीलुपर्ण्यपि ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

द्राक्षा ॥ ( तत्पर्य्यायो यथा,—

"द्राक्षा स्वादुफला प्रोक्ता तथा मधुरसापि च ।
मृद्वीका हारहूरा च गोस्तनी चापि कीर्त्तिता ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ )

दुग्धिका । इति मेदिनी । से, ६० ॥ गम्भारी । इति भावप्रकाशः ॥

मधुरस्रवा, स्त्री, ( मधुरस्य मधुररसस्य स्रवो यस्याः । ) पिण्डखर्ज्जूरी । इति राजनिर्घण्टः ॥

मधुरा, स्त्री, ( मधुर+टाप् । ) शतपुष्पा । ( अस्याः पर्य्यायो यथा,—

"शतपुष्पा शताह्वा च मधुरा कारवी मिसिः ।
अतिलम्बी सितच्छत्रा संहिता छत्रिकापि च ।
छत्रा शालेयशालीनौ मिश्रेया मधुरा मिसिः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ )

मिश्रेया । मथुरानगरी । मधुकर्क्कटिका । मेदा । मधूली । मधुयष्टिका । इति मेदिनी । रे, १६४ ॥ काकोली । शतावरी । हृहज्जीवन्ती । पालङ्क्यशाकम् । इति राजनिर्घण्टः ॥

मधुराम्रकः, पुं, ( मधुरश्चासौ आम्रश्चेति नित्यकर्म्मधारयः । ततः स्वार्थे कन् । ) आम्रातकः । इति शब्दचन्द्रिका ॥

मधुराम्लफलः, पुं, ( मधुरं मिष्टं आम्लवत् फलं यस्य । ) रेफलः । तत्पर्य्यायः । आरः २ । इति रत्नमाला ॥

मधुरालापा, स्त्री, ( मधुरः श्रुतिसुखकरः आलापः शब्दो यस्याः । ) शारिका । इति राजनिर्घण्टः ॥

मधुरालाबुनी, स्त्री, (अलाबु+बाहुलकात् नक् । पृषोदरादित्वात् ह्रस्वः ङीष् च । ततः मधुरा चासौ अलाबुनी चेति नित्यकर्म्मधारयः । ) राजालाबुः । इति राजनिर्घण्टः ॥

मधुरिका, स्त्री, (मधुर+स्वार्थे कन्+स्त्रियां टाप् अत इत्वञ्च ।) क्षुपविशेषः । मौरी इति भाषा । तत्पर्य्यायः । शालेयः २ शीतशिवः ३ छत्रा ४ मिश्री ५ मिश्रेया ६ । इत्यमरः । २।४।१०५ ॥ सालेयः ७ मिसिः ८ मिसी ९ मिश्रिः १० । इति तट्टीका ॥ अवाक्पुष्पी ११ मङ्गल्या १२ मधुरा १३ । इति रत्नमाला ॥ मधुरी १४ । इति शब्दरत्नावली ॥ अस्या गुणाः । रोचकत्वम् । शुक्रकारित्वम् । दाहरक्तपित्तनाशित्वञ्च । इति राजवल्लभः ॥

मधुरिपुः, पुं, ( मधोरसुरविशेषस्य रिपुर्नाशकत्वात् । ) विष्णुः । इत्यमरः । १ । १ । २० ॥ ( यथा गीतगोविन्दे । २ । ९ ।

"श्रीजयदेवभणितमतिसुन्दरमोहनमधुरिपुरूपम् ॥ )

मधुरेणुः, पुं, ( मधुर्म्मधुरो रेणुरस्य । ) कटभीवृक्षः । इति राजनिर्घण्टः ॥

मधुरोदकः, पुं, ( मधुराणि उदकानि यस्य । ) जलसमुद्रः । स तु स्वादूदकमयः पुष्करद्वीपवेष्टितः सप्तसमुद्राणां शेषसमुद्रः । इति जटाधरः ॥

मधुलं, क्ली, (मधु पुष्परसादिकं लाति स्वकारणत्वेन गृह्णातीति । ला+कः । ) मद्यम् । इति शब्दचन्द्रिका ॥ (निर्विषीकर्त्री मधुविद्यायां स्त्री । यथा, ऋग्वेदे । १ । १९१ । १० ।

"सोचिन्नुनमरातिनो वयं मरामारे
अस्य योजनं हरिष्ठामधुत्वामधुला चकार ॥"

"हे विष ! त्वा त्वां मधु अमृतं चकार विषस्य विषभावं दूरेऽपनोद्यामृतीचकारेति एवैव मधुला मधुराख्या निर्विषीकर्त्री मधुविद्या यद्वेतदादित्यस्य मण्डले विषयोजनं तेन चामृतीकरणं यदस्ति एषा मधुविद्या ॥" इति तद्भाष्ये सायनः ॥ )

मधुलग्नः, पुं, ( मधुर्म्मधुररसो लग्नोऽत्र । ) रक्तशोभाञ्जनः । इति रत्नमाला ॥

मधुलता, स्त्री, ( मधुप्रधाना लतेति मध्यलोपी कर्म्मधारयसमासः । ) शूलीतृणम् । इति राजनिर्घण्टः ॥

मधुलिका, स्त्री, ( मधुल+संज्ञायां कन् । टाप् अत इत्वञ्च । ) राजिका । इति राजनिर्घण्टः ॥ (विवृतिरस्या राजिका शब्दे ज्ञातव्या ॥ स्कन्दानुचरमातृगणविशेषः । यथा, महाभारते । ९ । ४६ । १९ ।

"पृथुवक्त्रा मधुलिका मधुकुम्भा तथैव च ॥")

मधुलिट्, [ ह् ] पुं, ( मधु लेढि आस्वादयतीति । लिह्+क्विप् । ) भ्रमरः । इत्यमरः । २ । ५ । २९ ॥ ( यथा, रघुवंशे । ९ । २९ ।

"मधुलिहां मधुदानविशारदा
कुरवका रवकारणतां ययुः ॥")

मधुलेही, [ न् ] पुं, ( मधु लेढीति । मधु+लिह्+णिनिः । ) भ्रमरः । इति शब्दरत्नावली ॥ ( यथा, भट्टिकाव्ये । २ । ७ ।

"हृतावधानं मधुलेहिगीतौ
प्रशान्तचेष्टं हरिणं जिघांसुः ॥")

मधुलोलुपः, पुं, ( मधुनि लोलुपः । ) भ्रमरः । इति राजनिर्घण्टः ॥

मधुवनं, क्ली, ( मधुना तन्नाम्ना दैत्येन कृतं वनम् । मध्यपदलोपी कर्म्मधारयः ।) मथुरास्थवनविशेषः । यथा, श्रीभागवते ४ । ८ । ४२ ।

"तत्तात ! गच्छ भद्रं ते यमुनायास्तटं शुचि ।
पुण्यं मधुवनं यत्र सान्निध्यं नित्यदा हरेः ॥"

( मधुप्रधानं वनमिति । ) किष्किन्धायां सुग्रीवस्य वनविशेषः । इति रामायणे किष्किन्धाकाण्डम् ॥ ( यथा, महाभारते । ३ । २८१ । २७ ।

"वालिना रक्षितं यत्तत् स्फीतं मधुवनं महत् ।
त्वया च प्लवगश्रेष्ठ ! तद्भुङ्क्ते पवनात्मज ॥")

मधुवनः, पुं, ( मधौ वनति शब्दायते इति । वन+अच् । ) कोकिलः । इति शब्दचन्द्रिका ॥

मधुवल्ली, स्त्री, ( मधुप्रधाना वल्ली । ) यष्टीमधु । क्लीतनकम् । इति राजनिर्घण्टः ॥ (कारवेल्लकम् । तत्पर्य्यायो यथा,—

"तोयवल्ली राजवल्ली मधुवल्ली कारवेल्लकम् ॥"
इति वैद्यकरत्नमालायाम् ॥ )

मधुवारः, पुं, ( मधुनो मद्यस्य वारः समयः पर्य्यायो वा ।) मधुक्रमः । इत्यमरः ।२।१०।४१॥ स च पुनः पुनर्मद्यपानपरिपाटी । इति तट्टीकायां भरतः ॥

मधुवीजः, पुं, (मधु मधुरं बीजं यस्य । ) दाडिमः । इति राजनिर्घण्टः ॥ ( गुणादिविवरणमस्य दाडिमशब्दे ज्ञातव्यम् ॥ )

मधुवीजपूरः, पुं, ( मधूनां मधुपूर्णानां बीजानां पूरः समूहो यत्र । ) मधुकर्कटिका । मीठा बिजौरा इति हिन्दी भाषा । तत्पर्य्यायः । मधुपर्णी २ मधुरकर्कटी ३ मधुरवल्ली ४ मधुकर्कटी ५ मधुरफला ६ महाफला ७ वर्द्धमाना ८ । अस्य गुणाः । मधुरत्वम् । शिशिरत्वम् । दाहनाशित्वम् । त्रिदोषशमनत्वम् । वृष्यत्वम् । पथ्यत्वम् । गुरुत्वम् । दुर्ज्जरत्वञ्च । इति राजनिर्घण्टः ॥

मधुव्रतः, पुं, ( मधु मधुसञ्चयो व्रतं व्रतमिव सततानुशीलनीयं यस्य । यद्वा, मधु व्रजयति नियतं भुङ्क्ते इति । व्रत+अण् । ) भ्रमरः । इत्यमरः ।२।५।२९ ॥ (यथा, भागवते । ३।२८।२८ ।

"मालां मधुव्रतवरूथगिरोपघुष्टाम् ॥"

मध्वर्थं व्रतं कर्म्म यस्य । उदकार्थकर्म्मणि, त्रि । यथा, ऋग्वेदे । ६ । ७० । ५ ।

"मधुनो द्यावापृथिवी मिमिक्षतां मधुश्चुता
मधुदुघे मधुव्रते ॥"

"मधुव्रते उदकार्थकर्म्माणौ ।" इति तद्भाष्ये सायनः ॥ )

मधुशर्करा, स्त्री, (मधुजाता शर्करा ।) मधुजातशर्करा । सिताखण्ड इति भाषा ॥ यथा,—